[५३७] पुण्याहवाचनादिभ्यो लुग् वक्तव्यः। (म. भा. २.३६२)

[1]पुण्याहवाचनं प्रयोजनमस्य पुण्याहवाचनम्। स्वस्तिवाचनम्। शान्तिवाचनम्।

अनुप्रवचन। उत्थापन। प्रवेशन। अनुप्रवेशन। उपस्थापन। संवेशन। अनुवेशन। अनुवचन। अनुवादन। अनुवासन। [2]आरम्भण। आरोहण। प्ररोहण। अन्वारोहण। अनुप्रवचनादिः॥

## समापनात् सपूर्वपदात्। (११२/१७७८)

समापनशब्दात् [3]सपूर्वपदात् विद्यमानपूर्वपदाच्[4] छः प्रत्ययो भवति तदस्य प्रयोजनम् इत्येतस्मिन् [5]विषये। ठञोऽपवादः। छन्दःसमापनं प्रयोजनमस्य छन्दःसमापनीयम्। व्याकरणसमापनीयम्। पदग्रहणं बहुच्–पूर्वनिरासार्थम्॥

## ऐकागारिकट् चौरे। (११३/१७७६)

ऐकागारिकट् इति निपात्यते चौरेऽभिधेये। एकागारं प्रयोजनम् अस्य ऐकागारिकः चौरः। ऐकागारिकी। किमर्थमिदं [6]निपात्यते, यावता प्रयोजनम् [7]इत्येव सिद्धष्ठञ्? चौरे नियमार्थं [8]वचनम्। [9]इह मा भूत्, एकागारं प्रयोजनमस्य भिक्षोः इति। टकारः कार्यावधारणार्थः, ङीबेव भवति न ञित्स्वरः इति। अपरे [10]पुनर् इकट् प्रत्ययं वृद्धिं च निपातयन्ति॥

## आकालिकडाद्यन्तवचने। (११४/१७७७)

आकालिकट् इति निपात्यते आद्यन्तवचने। [11]समानकालशब्दस्य [12]आकालशब्द आदेशः। [13]आद्यन्तयोश्चैतद् विशेषणम्। इकट् प्रत्ययश्च निपात्यते। समानकालौ आद्यन्तौ अस्य आकालिकः स्तनयित्नुः। आकालिकी विद्युत्। जन्मना तुल्यकालविनाशा। [14]उत्पादानन्तरं विनाशिनीत्यर्थः।

[५३८] आकालाट् ठंश्च।

चात् ठञ् च। आकालिका विद्युत्[15]। ठञः पूर्णोऽवधिः॥

## तेन तुल्यं क्रिया चेद्वतिः। (११५/१७७८)

तेन इति तृतीयासमर्थात् तुल्यम् इत्येतस्मिन्नर्थे वतिः प्रत्ययो भवति, यत् तुल्यं क्रिया चेत् सा भवति। ब्राह्मणेन तुल्यं वर्तते[17] ब्राह्मणवत्। राजवत्[18]। क्रियाग्रहणम् किम्? [19]गुणतुल्ये मा भूत्। पुत्रेण तुल्यः स्थूलः। पुत्रेण तुल्यो गोमान्[20]॥

---

1 पुण्याहवचनं ड. 2. अनारम्भणम् क. 3. सपूर्वपदात् नास्ति क. ह. 4. प्रातिपदिकात् च इत्यधिकम् क. ह. 5. अर्थे क. ह. 6. निपातनम् क, निपतनं ह. 7. इत्यनेनैव ठञ्सिद्धिः क. 8. वचनम् नास्ति क. 9. तेन इत्यधिकम् क. 10. पुनर् नास्ति क. फ. 11. समानकालस्य क. 12. आकालादेशः क. 13. आद्यन्त–विशेषणयुक्तात् इकट् प्रत्ययो निपात्यते क. 14. उत्पादनं तदन्तविनाशनिमित्तमित्यर्थः ब, उत्पन्नानन्तरम् प. म. 15. आकालिनी इत्यधिकम् ब. ह. 16. इत्यर्थे अ. ब. ड. 17. इति इत्यधिकम् क. फ. 18. क्षत्रियवत् इत्यधिकम् क. फ. ड. ह. 19. गुणद्रव्यतुल्ये ब. ड, गुणतौल्ये क, गुणतुल्यत्वे ह. 20. यन्त्रेण तुल्यः इत्यधिकम क.